# Shri Hayagriva Prarthana Dvadashakam

# શ્રીહયગ્રીવપ્રાર્થનાદ્વાદશકમ્

## Document Information

Text title : Hayagriva Prarthana Dvadashakam

File name : hayagrIvaprArthanAdvAdashakam.itx

Category : vishhnu, dvAdasha

Location : doc_vishhnu

Transliterated by : Chandrasekhar Karumuri

Proofread by : Chandrasekhar Karumuri

Latest update : August 13, 2023

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

September 24, 2023

*sanskritdocuments.org*

# શ્રીહયગ્રીવપ્રાર્થનાદ્વાદશકમ્

નમોવેદાન્તનિધયે શાસ્ત્રાણાં પતયે નમઃ ।
યજ્ઞાનાં નિધયે તુભ્યં કર્મણાં ફલદાયિને ॥ ૧॥

વિદ્યાધરાય યોગાય વાગીશાય નમો નમઃ ।
અચિન્ત્યાય નમો નિત્યં સર્વજ્ઞાનાત્મને નમઃ ॥ ૨॥

ઋક્મૂર્તિસ્ત્વં મહાબાહો! યજુર્મૂર્તિરધોક્ષજઃ ।
સામમૂર્તિસ્ત્વમેવાદ્યઃ સર્વદાઽથર્વમૂર્તિમાન્ ॥ ૩॥

સર્વજ્ઞાનમયોઽસિ ત્વં હતજ્ઞાનોઽહમચ્યુત !।
દેહિ મે સર્વવિજ્ઞાનં હયગ્રીવ! નમોઽસ્તુ તે ॥ ૪॥

પ્રપન્નોઽહં હયગ્રીવં પ્રપન્નાર્તિહરં હરિમ્ ।
યસ્ય પ્રસાદલેશેન વાગીશત્વમુપાવિશત્ ॥ ૫॥

ધન્યોઽહં કૃતકૃત્યોઽહં મુક્તોઽહં કર્મબન્ધનૈઃ ।
હયગ્રીવપદામ્ભોજસ્મરણેનૈવ ચેતસા ॥ ૬॥

શ્રીભૂનીળાદિસહિતં સર્વાભરણભૂષિતમ્ ।
હયગ્રીવમહં વન્દે ચક્રપદ્મધરં હરિમ્ ॥ ૭॥

શઙ્ખચક્રમહાપદ્મજ્ઞાનપુસ્તકધારિણમ્ ।
હયગ્રીવમહં વન્દે વિદ્યૈશ્વર્યપ્રદાયકમ્ ॥ ૮॥

શુદ્ધસ્ફટિકસઙ્કાશં પુણ્ડરીકાયતેક્ષણમ્ ।
સર્વશાસ્ત્રપ્રદાતારં હયગ્રીવમુપાસ્મહે ॥ ૯॥

જ્ઞાનાનન્દમયન્દેવં નિર્મલસ્ફટિકાકૃતિમ્ ।
આધારં સર્વવિદ્યાનાં હયગ્રીવમુપાસ્મહે ॥ ૧૦॥

શઙ્ખચક્રમહામુદ્રાપુસ્તકાઢ્યં ચતુર્ભુજમ્ ।
સમ્પૂર્ણચન્દ્રસઙ્કાશં હયગ્રીવમુપાસ્મહે ॥ ૧૧॥

વિશુદ્ધવિજ્ઞાનઘનસ્વરૂપં વિજ્ઞાનવિશ્રાણનબદ્ધદીક્ષમ્ ।
દયાનિધિં દેહભૃતાં શરણ્યં દેવં હયગ્રીવમહં પ્રપદ્યે ॥ ૧૨॥

ઇતિ શ્રીહયગ્રીવપ્રાર્થનાદ્વાદશકં સમ્પૂર્ણમ્ ।

Encoded and proofread by Chandrasekhar Karumuri

*Shri Hayagriva Prarthana Dvadashakam*

pdf was typeset on September 24, 2023

Please send corrections to *sanskrit@cheerful.com*